# षष्ठोऽध्याय:

## उपसंहार:

मुक्ति: परमपुरुषार्थ इति सर्वैर्दार्शनिकै: विनावितर्कं स्वीक्रियते । तत्राद्वैतवेदान्तिनां मतमेव शास्त्रयुक्तिसिद्धम् । अन्येषु दर्शनेषु सांख्यादिषु दु:खनिवृत्तिरेव मुक्तिरिति स्वीकृतमस्ति । तत्र न सुखापरपर्यायस्यानन्दस्य लेशोऽपि । केवलं चार्वाके दर्शने पूर्वमीमांसायाञ्च सुखस्य कथा चर्चिताऽस्ति। तच्च सुखं न नित्यम् । अतएव विवेचकानां विवेकिनां सर्वथाऽनुमोदितं न भवति पुरुषार्थत्वेन । नित्यस्य सुखापरपर्यायस्यानन्दस्य मुक्तावधिगति: वेदान्तिनामेव सम्मता । तादृशस्यानन्दस्यैव सर्वै: प्राणिभिरभिलष्यमाणत्वात् । श्रुतावुक्तम् --

"अङ्गुष्ठमात्र: पुरुषो ज्योतिरिवाधूमक: ।
ईशानो भूतभव्यस्य स एवाद्य स उ श्व: । एतद्वै तत्" ।[1]

"यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थय: ।
अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम् ।।"[2]

आभि: श्रुतिभिर्मुक्ते: परमपुरुषार्थत्वं तस्याश्चानन्दरूपत्वं सिध्यति ।

---

१. कठोपनिषद् - २/१/१३

२. कठोपनिषद् - २/३/१५

अयं ह्यानन्द आत्मस्वरूप एव । किन्तु आनन्दरूपमात्मस्वरूपमनादिनाऽज्ञानेनावृतमिति संसारदशायामानन्दो नानुभूयते । आनन्दानुभवार्थं मुक्तेरधिगमार्थं न प्रयासः । आत्मस्वरूपस्यानन्दस्य नित्यसिद्धत्वात् । स्वतःसिद्धे वस्तुनि न प्रयासापेक्षा । केवलमावरणनिवृत्तौ प्रयासः कर्त्तव्यो भवति । आवरणे निवृत्ते आनन्दस्य स्वतःसिद्धप्रकाश उपपद्येत ।

आत्मा हि नित्यः । आनन्दश्चात्माऽभिन्नतया नित्य एव । आत्मनो नित्यतया तत्स्वरूपस्यानन्दस्यापि नित्यत्वमेव वक्तव्यम् । आत्मा स्वप्रकाशः, आनन्दोऽपि तथा । अतएव श्रुतिर्वदति --

"सत्यं ज्ञानमनन्तं ब्रह्म"[१]

"आनन्दं ब्रह्मणो विद्वान् ।"[२]

"आनन्दो ब्रह्मेति व्यजानात् ।"[३]

"विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं तिष्ठमानस्य तद्विद इति" ।।[४]

---

१. तैत्तिरीयोपनिषद् - २/१/१

२. तैत्तिरीयोपनिषद् - २/६ "यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान । न बिभेति कुतश्चन ।।" इति ।

३. तैत्तिरीयोपनिषद् - ३/६ "आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति ।

४. वृहदारण्यकोपनिषद् - ३/६/२८/७

"को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति । यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति ।"[1]
इत्यादिभिः श्रुतिभिरात्मन आनन्दरूपत्वं स्वप्रकाशत्वं नित्यत्वञ्च प्रतिष्ठितं भवति ।

यद्यपि लोके सुखमात्मनि वर्त्तत इत्येवं व्यवह्रियते, तत्तु औपचारिकम् । सुखस्यात्मस्वरूपत्वं श्रुतिसिद्धमेव । एवञ्च नानयोराधाराधेयभावो भवितुमर्हति । आत्मानन्द एव विषयेण सह सम्बन्धवशात् लौकिकत्वेन स्फुरति । तमोऽभिभवे सत्यात्मन एव विषयावच्छेदेन परिपूर्णतयाऽप्रकाश्यमानसुखरूपेणानुभूयते । जनाश्च भ्रान्तिवशादात्मस्वरूपस्य सुखस्य विषयनिष्ठत्वं मन्यन्ते । वस्तुत आत्मन्येव सुखं, नान्यत्र । उक्तञ्च भाष्यरत्नप्रभायाम् -- "शुभकर्मजन्यवृत्तिव्यक्तमानन्दः"[2] पञ्चदश्यामपि विषयानन्दपरिच्छेदे एवमुक्तं भवति —

"वृत्तिष्वेतासु सर्वासु ब्रह्मणश्चित्स्वभावता ।
प्रतिविम्बति शान्तासु सुखञ्च प्रतिविम्बति ।।"[3]

---

१. तैत्तिरीयोपनिषद् - २/७

२. ब्रह्मसूत्रशाङ्करभाष्यम् -- अ. १, पा. १, सू. १ - पृ: ८
ब्रह्मसूत्रशाङ्करभाष्यम् -- स्वर्गीयमहादेवशास्त्रिवाकरेमहोदयेन सम्पादितं, मुम्बाइत ; १६३४ ख्रीष्टाब्दे पाण्डुरङ्गजवजीकर्तृक प्रकाशितम् ।

३. पञ्चदशी - पञ्चदशपरिच्छेदः ५मः श्लोकः

वृहदारण्यकोपनिषद्यप्युक्तम् -- "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति"[१] इति ।

एतादृश आनन्दो न प्रयाससाध्यः । अतएव, आनन्दप्राप्तये धर्मस्य नोपयोगिता । धर्मस्यानुपयोगित्वं पूर्वमेव विचारितम् । अतएव वेदप्रतिपादितानां यज्ञादीनां मुक्तौ नोपयोगः । यतो हि, मुक्तिर्नानन्दप्राप्तिरूपा किन्तु अविद्यानिवृत्तिरेव मुक्तिः । इयमविद्यानिवृत्तिर्नातिरिक्तपदार्थः ; अपि त्वात्मनोऽभिन्नतयात्मस्वरूप एव । इत्यपि प्रतिपादितम् ।

एवं सत्यात्मनो नित्यतयाऽविद्यानिवृत्तेरपि नित्वत्वात्, अतएव सर्वदैव सत्त्वात् किमर्थं ब्रह्मज्ञानापेक्षा ? तदा च, ज्ञानान्मुक्तिरिति कथमसकृदुच्यते ?

अस्याक्षेपस्य समाधानं पूर्वमेवोक्तम् । नात्मैव मुक्तिरपित्वविद्यानिवृत्त्युपलक्षित आत्मैव मुक्तिरिति । तेनात्मज्ञानेन यदाऽविद्यानिवृत्तिर्भवति, तदैवात्माऽविद्यानिवृत्त्युपलक्षितो भवति । अविद्यानिवृत्तेः प्राक् त्वात्माऽविद्यावरणोपलक्षित एवास्ति नाविद्यानिवृत्त्युपलक्षितः । अतएव, आत्मज्ञानस्यावश्यकत्वम् । अतएव, ज्ञानान्मुक्तिरिति सङ्गच्छते ।

इयमविद्यानिवृत्तिर्नात्मनो भिन्ना । भिन्नत्वेऽयं प्रश्नो भवेत् -- इयमविद्यानिवृत्ति ; किं मिथ्याऽमिथ्या वा ?

---

१. वृहदारण्यकोपनिषद् - ४/३२

अविद्यानिवृत्तेरमिथ्यात्वस्वीकारेऽद्वैतव्याघात: । मिथ्यात्वे मिथ्या-वस्तुनो निवर्त्तकस्य कस्यचिदभावात् पुनश्च बन्धप्रसङ्ग: ।

आत्मज्ञानेनाविद्यानिवृत्तिर्भवति । अविद्यानिवृत्तिश्च मिथ्या । अतएव, तस्य निवर्त्तकान्तरं मृग्यम् । न चात्मज्ञानादन्यत् किञ्चित् कस्यचि-न्निवर्त्तकं वेदान्तवादिभिरभ्युपगम्यते । अतएव, अविद्यानिवृत्तेर्मिथ्यात्वं न स्वीकर्त्तुं शक्यते ।

अविद्यानिवृत्तेरात्मस्वरूपत्वेऽपि ज्ञानात् पूर्वं तस्या अविद्यानिवृत्ते-रात्मस्वरूपत्वमिति ज्ञानमेव नास्ति । अतएव, भ्रान्तिर्विद्यते । लोको वदति - ममाविद्यानिवृत्तिर्नास्ति । ज्ञानेन तु परिज्ञायतेऽविद्या पूर्वमपि नासीदिदानीमपि नास्ति न भविष्यत्यपि भविष्यति । आत्मैवाविद्या-निवृत्तिरूप इति ज्ञानापेक्षयाऽविद्यानिवृत्तेरात्मस्वरूपत्वं स्वीकृतमिति न पूर्वोक्तशङ्कावसर: ।

वेदान्तिभिरविद्यायास्तत्कार्याणाञ्च मिथ्यात्वमभ्युपगम्यते । तत्र कश्चित् पृच्छेत् -- इदं मिथ्यात्वं मिथ्या सत्यम्वा ?

यदि मिथ्यात्वं मिथ्या स्यात्तदाऽविद्यायास्तत्कार्याणाञ्च सत्यत्वा-पत्ति: । मिथ्यात्वस्य सत्यत्वे पूर्वोक्त एव दोष: । इत्यपि विस्तृतं पूर्वमुक्तम् ।

मिथ्याभूतस्य प्रपञ्चस्य प्रपञ्चसमानधर्मत एव स्वाभाविकी । प्रपञ्च-मिथ्याऽनिर्वाच्यरूपा । मिथ्यात्वस्यापि तथैवानिर्वाच्यस्वरूपता स्यात् ।

एवञ्च, मिथ्यात्वस्यानिर्वाच्यस्वभावत्वाद्धर्मिणः प्रपञ्चस्य सत्यत्वनिवारकम् । धर्मस्य स्वविरुद्धधर्मप्रतिक्षेपकत्वे ह्युभयवादिसिद्धं धर्मिसमसत्त्वं नियामकं न पारमार्थिकत्वमिति ।

ननु, आरोपितघटत्वादिकं यथारोपाधिष्ठानभूते स्वाश्रये स्वविरुद्धा-घटत्वादिप्रतिक्षेपकत्वादर्शनात् सत्यमेव घटत्वादिस्वाश्रये स्वविरुद्धधर्मप्रतिक्षेपकत्वेन कल्पनीयमिति कथं मिथ्याभूतं मिथ्यात्वं प्रपञ्चे सत्यत्वप्रतिक्षेपकं भवेत् ?

उच्यते, धर्मस्य स्वविरुद्धधर्मप्रतिक्षेपकत्वे हि धर्मिसमसत्त्वं तन्त्रं घटत्वादौ परमतेन पारमार्थिकत्वरूपं सत्यत्वमस्ति । तथा च धर्मिसमान-सत्ताकत्वं मतद्वयसम्मतमेव । एवञ्च घटत्वादिधर्मस्य स्वाभाविकाश्रये स्वविरुद्ध-धर्मप्रतिक्षेपकत्वे प्रयोजकशङ्कायामुभयमतसम्प्रतिपन्नमेव धर्मिसमसत्ताकत्वं प्रयोजकं कल्पनीयम् । अतएव, न तत्र विप्रतिपत्तिः ।

किञ्च, यो धर्मो यस्य स्वविषयसाक्षात्कारानिवर्त्यः, स तत्र स्वविरुद्धधर्मप्रतिक्षेपकः । यथा शुक्तौ शुक्तितादात्म्यं तद्विषयसाक्षात्कारा-निवर्त्यमशुक्तित्वविरोधि, तत्रैव रजततादात्म्यं तन्निवर्त्यमरजतत्वाविरोधि-- इति व्यवस्था विहिताऽस्ति । तथैव, प्रपञ्चमिथ्यात्वं कल्पितमपि प्रपञ्च-साक्षात्कारानिवर्त्यमिति सत्यत्वप्रतिक्षेपकमेव । ब्रह्मणः स्वप्रपञ्चत्वं तु ब्रह्म-साक्षात्कारनिवर्त्यमिति न निष्प्रपञ्चप्रतिक्षेपकम् ।

अत्र पृच्छ्यते -- वेदान्तशब्दनिष्ठयोग्यतायाः सत्यत्वं किं तस्याः शाब्दबोधरूपार्थक्रियाकारित्वसिद्ध्यर्थमेवापेक्षते किम्वा ब्रह्मणः सत्यत्वसिद्ध्यर्थम् ?

तत्र न प्रथम: । अर्थक्रियाकारितस्य व्यावहारिकस्य प्रपञ्चे सम्भवात् । ब्रह्मपरे वेदान्ते सत्यादिपदसत्त्वाद्ब्रह्मण: सत्यत्वसिद्धे: । अतएव, अग्निहोत्रादिवाक्ये सत्यादिपदाभावादर्थक्रियाकारित्वसत्त्वेऽपि प्रबलाद्वैतश्रुतिविरोधादग्निहोत्रादीनां सत्यत्वसिद्धि: । शब्दार्थयोग्यतयो: समानसत्ताकत्वनियमस्य निष्प्रमाणकत्वात् । घटज्ञानप्रामाण्यस्याघटत्ववत् सत्यभूतब्रह्मज्ञानप्रामाण्यस्यापि तदतिरिक्तघटितत्वेन ब्रह्मातिरिक्ताब्रह्मत्ववैशिष्ट्यघटितत्वेन मिथ्यात्वोपपत्ते: । एतच्च सर्वं "तदनन्यत्वमारम्भणशब्दादिभ्य:"[१] इत्यधिकरणे विस्तरेण उक्तप्रायम् । सर्वस्य वियदादिप्रपञ्चमिथ्यात्वम् विचारितम् ॥ अतएव न ब्रह्माद्वैतहानि: । श्रुतिरपि द्वैतस्य मिथ्यात्वं ब्रवीति, "अनृतेन हि प्रत्यूढा"[२] इति ।

अनुमानञ्च -- विमतं मिथ्या दृश्यत्वात्, जड़त्वात्, परिच्छिन्नत्वादित्यादिहेतुभि: प्रपञ्चस्य मिथ्यात्वं मधुसूदनयतिभि: विस्तरश उक्तम् ।

अर्थापत्तिरपि प्रपञ्चस्य मिथ्यात्वं साधयति । "तरति शोकमात्मविद्"[३] "तमेव विदित्वाऽतिमृत्युमेति नान्य: पन्था विद्यतेऽयनाय"[४] "ब्रह्म वेद ब्रह्मैव भवति" -- इत्यादिभि: श्रुतिभि: शोकशब्दवाच्यस्य संसारस्य ज्ञानेन निवृत्ते:

---

१. ब्रह्मसूत्र - २/१/१४

२. छान्दोग्योपनिषद् - अष्टमोऽध्याय:

३. छान्दोग्योपनिषद् - ७/१/३

४. श्वेताश्वतरोपनिषद् - ३/८

प्रतिपादनात् सत्यवस्तुनो ज्ञाननिवर्त्यत्वमन्यथानुपपन्नमिति संसारस्य मिथ्यात्वमुपपद्यते ।

प्रत्यक्षेणापि प्रमाणेन भेदासिद्धौ भेदस्य मिथ्यात्वमुपपद्यते । तथा हि, किं भेदः प्रत्यक्षेण सिध्यतीति जिज्ञासायां भेदवादी यदि वदेत् प्रत्यक्षेण भेदः सिध्यति, घटादिप्रत्यक्षे घटादेरितरेभ्यो भेदो ज्ञायते -- इत्यपि वार्तम् । घटस्य प्रत्यक्षं घट इत्याकारेण लोकानां भवति । न तु तत्र भेदः प्रतीयते । एतच्च तत्र भेदस्य प्रत्यक्षं कथं भवेत् ? यद्युच्येत -- भेदो हि घटधर्मः, अतएव घटप्रत्यक्षकाले भेदोऽपि प्रत्यक्षीक्रियते ; भेदस्य वस्तुधर्मत्वेन वस्तुनो घटपटादेर्भेद इत्याकारेण प्रतीतिर्न भवति ।

तत्रोच्यते - भेदस्य घटधर्मत्वं किं प्रत्यक्षेण ज्ञायते ? यदि तथा स्यात्तदा घट इति प्रत्यक्षकाले भिन्न इत्यपि प्रतीतिः स्यात् । तथा तु न भवति लोकानाम् । अतएव, भेदस्य वस्तुधर्मत्वं नैव सिध्यति ।

प्रत्यक्षप्रमाणेन भेदस्यासिद्धौ प्रत्यक्षसापेक्षतयाऽनुमानस्यापि तत्र न प्रामाण्यम् । भेदे श्रुतिप्रमाणमपि नास्ति । परन्तु भेदविरोधिबोधकतया श्रुतेः प्रवृत्तिर्दृश्यते । तथा हि, "नेह नानाऽस्ति किञ्चन"[१] "नेति नेति"[२]

---

१. बृहदारण्यकोपनिषद् ४/४/१६ - "मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।।"

२. ,, ,, ३/६/२६ ; ४/२/४ ; ४/४/२२ ; ४/५/१५

इत्यादिश्रुतिभिः भेदस्य निषेध एव ज्ञाप्यते । अतएव, भेदस्य मिथ्यात्वान्न ब्रह्मणोऽद्वैतव्याघातः ।

एवञ्च, श्रुतिस्मृतिन्यायप्रस्थानानां तद्भाष्यटीकादीनाञ्च श्रुत्यविरोधिनीनां प्रति तत्साक्षात्कारप्रतिपादनेनोपयोगित्वं प्रतिपाद्यते, इति प्रस्थानत्रयसिद्धं ब्रह्मात्मैकत्वं प्रतिष्ठितं भवति । श्रुतिवाक्यसमुद्धारेणैवैतत्सर्वं पूर्वं निवेदितम् ।

यद्यपि ज्ञानान्मुक्तिरिति श्रुत्वा कश्चिन्मन्येत - मुक्तिर्ज्ञानजन्या, तेन च मुक्तेरनित्यता सिध्येत् । तथाहि मुक्तिरनित्या जन्यत्वात्, कर्मफलवत् ; अनेनानुमानेन मुक्तेरनित्यत्वं सिध्यति । तथा च सति, अनित्यायाः मुक्तेरधिगमार्थं विवेकिनां प्रवृत्तिः कथं स्यात् ?

तत्रोच्यते -- मुक्तिः यद्यप्युच्यते ज्ञानजन्या, वस्तुतस्तु न तस्याः जन्यत्वम् । किन्तु नित्यज्ञानानन्दस्वरूपत्वमेव तस्याः सिध्यति । एवञ्च सति, तथाविधात्मस्वरूपस्य नित्यतया मुक्तेरपि नित्यत्वमिति ।

ननु, यदि मुक्तिर्नित्या स्यान्न ज्ञानजन्या, अपित्वात्मस्वरूपभूता, तथा सति तस्याः सर्वदाविद्यमानत्वात् सिद्धायाः मुक्तेरधिगमार्थं ज्ञानलाभाय कथं प्रयासः क्रियते ?

उच्यते, -- न ज्ञानेन मोक्षस्योत्पत्तिः क्रियते । आत्मा मुक्तिस्वरूप एव । तथापि तादृशस्यात्मस्वरूपस्य सर्वदा सत्त्वेऽप्यविद्यया मोमुह्यमानलोकोऽहं बद्धो न मुक्तः, केनोपायेनात्मानं मोचयिष्ये इत्यादि भ्रान्त्या

शोकुच्यते । तच्छोकनिवारणाय मातृपितृसहस्रेभ्योऽपि हितैषिणी श्रुति: शोक-कारणाविद्यानिवृत्त्यर्थं पुन: पुनरुपदिशति । उपदेशवचांसि पूर्वमेवोक्तानि ।

जीवस्य मुक्तिर्भवति । स च जीव एको बहवो वेति विप्रतिपत्तिर्वर्त्तते । तत्र बहुजीववाद एव श्रुतिसिद्ध:, आचार्यसम्मतश्च पूर्वमुक्त: । तत्र प्रमाणमपि प्रदर्शितमेव ।

तत्र जीवभेदस्वीकारे विवरणाचार्याणां प्रतिविम्बवाद:, वार्त्तिककाराणामाभासवाद:, भामतीकृतामवच्छेदवाद: सप्रमाणं पूर्वं विचारित: । अत्रैवोपसंहारे पुनरुक्तिर्न क्रियते ।

यद्यपि मुक्ति: आत्मस्वरूपतया स्वत:सिद्धा, तथापि तदुपलब्ध्यै प्रयासोऽपेक्ष्यते । तेन च प्रयासेन ब्रह्मसाक्षात्कारे जाते आवरकमज्ञानं निवर्त्तते । तदानीं स स्वस्वरूपमधिगच्छति । ब्रह्मज्ञानस्य महानप्रभाव:, येन प्रभावेनानादिकालत आत्मस्वरूपावरिकाया अविद्याया निवृत्तिर्भवति -- इति । तथापि नैतदत्रालोच्यविषयतामाप्नोति । अपितु जीवन्मुक्तिरेव ।

एवञ्च, यदि आत्मज्ञानेनाविद्या सर्वथा उच्छिद्येत, तदा जीवन्मुक्ते: कथैव नावतरतीत्यालोच्यविषयस्यासत्यत्वेनालोचनाया अनुपपत्तिरेव । तदर्थमिदमुच्यते -- ज्ञानमविद्यानिवर्त्तकमिति सत्यम्, किन्तु, अविद्यासंस्कारस्याविद्याजन्यत्वेऽपि न ज्ञानेन तस्य निवर्त्तकत्वं स्वीक्रियते । अतएवोच्यते, केनचिदखण्डाकारमनोवृत्तिरूपं ब्रह्मज्ञानं नाज्ञाननिवर्त्तकम् । तादृशवृत्तेर्जडत्वेनाज्ञानस्य च प्रकाशनिवर्त्तकत्वनियमेन जडरूपवृत्तिनिवर्त्तकत्वायोगात् । किन्तु तादृश-

मनोवृत्त्यारूढश्चैतन्यप्रकाश एवाज्ञाननिवर्त्तक: । चैतन्यस्य स्वरूपेणाज्ञानाश्रयतयाऽज्ञानसाक्षितया चाज्ञाननिवर्त्तकत्वेऽप्यखण्डाकारवृत्त्युपारूढतया ज्ञाननिवर्त्तकत्वमुपपद्यते । यथा, किञ्चित् काष्ठमाश्रित्याग्नि: ग्रामनगरादिकं दहन्नाश्रयभूतं काष्ठमपि दहति, तथैव, अखण्डमनोवृत्तिमाश्रित्य चैतन्यप्रकाशो निखिलं प्रपञ्चमाश्रितमज्ञानञ्च निवर्त्तयन् वृत्तिमपि निवर्त्तयतीति तादृशवृत्तिनिवृत्ते: प्राक् जीवन्मुक्तिरुपपद्यते ।

अपरे त्वाहु:, तत्त्वसाक्षात्कारवत्त्वेऽपि जीवन्मुक्तस्य देहादिप्रतिभासदर्शनात् तत्त्वसाक्षात्कारोदयोऽपि जीवन्मुक्तस्य देहादिप्रतिभासोऽविद्याया: लेशतोऽनुवर्त्तनेन सिध्यति ।

तत्रायं विचार: क्रियते - कोऽयमविद्यालेशो यस्यानुवृत्त्या जीवन्मुक्ति: सिध्यति ?

तत्र केचिदाहु: - अविद्या ह्यावरणविक्षेपशक्तिमती । ज्ञानेन तादृशाऽविद्याया आवरणशक्त्यंशनिवृत्तावपि प्रारब्धकर्मवर्त्तमानदेहाद्यनुवृत्तिप्रयोजकतया तस्या विक्षेपशक्त्यंशोऽनुवर्त्तते । अयमेवाविद्यालेश इत्युच्यते ।

अन्ये त्वाहु:, प्राक् कस्मिंश्चित् पात्रे लशुननिधाने कियत्कालानन्तरं तल्लशुनेऽन्यत्र नीते पूर्वोक्तपात्रे लशुनेऽसत्यपि यथा लशुनगन्धोऽनुवर्त्तते, तथैव तत्त्वज्ञानेनान्त:करणाद्युपादानभूताया अविद्याया: निवृत्तावप्यविद्याजन्य: कश्चिद्देहादिस्थितिप्रयोजकोऽविद्यासंस्कारोऽनुवर्त्तते । अयमेवाविद्यालेश इत्युच्यते ।

अपरे त्वाहु:, पटे दग्धे यथा पटाकारतया भस्मन्यप्यनुवृत्ति-र्दृश्यते, तथैव तत्त्वज्ञानेन वाधिताऽविद्या दृढतरकार्याक्षमत्वं नीताऽपि दग्धपटन्यायेनानुवर्त्तते । तदेवानुवर्त्तनमविद्यालेश इत्युच्यते ।

अपरे तु, ब्रह्मज्ञानेनाविद्याया: सर्वथा उच्छेदात् लेशतोऽप्यविद्याया अनुवृत्तिर्न सम्भवति । अतएव, जीवन्मुक्तिर्नाभ्युपेयत इति ।

तन्न समीचीनम् । "तस्य तावदेवचिरम्"[१] इत्यादिश्रुतिरप्रमाणं स्यात् ।

किञ्च, श्रुतिभिन्नानामपि शास्त्राणां प्रामाण्यसिद्ध्यर्थं जीवन्मुक्ति-स्वीकार आवश्यक: । एवञ्च सति, प्रश्नो भवेत् -- यदि ज्ञानेनाविद्याया: निवृत्तावपि संस्काररूपोऽविद्यालेशोऽनुवर्त्तेत, तदा तस्मादेव संस्काराद्द्वैत-प्रतिभासस्याप्यनुवृत्तिर्भवेत् । निवृत्तसर्पविभ्रमस्यापि संस्कारवशाद्भयाद्यनुकम्पादि-दर्शनात् । एवञ्च संस्कारवशात् यदि "चक्रभ्रमणवद्धृतशरीर:"[२] स्यात्तदा संस्कारवशादेव द्वैतस्यापि भानं स्यात् । तथा च मुक्तेरेवानुपपत्ति: ज्ञानस्य व्यर्थत्वात् ।

मैवम् । संस्कारस्याप्यविद्याकार्यत्वादविद्यानिवृत्तौ तन्निवृत्ति: स्यादेव ।

---

१. छान्दोग्योपनिषद् - ६/१४/२

२. सांख्यसूत्रम् -

तत्रोच्यते - संसारमूलकारणभूताऽविद्या यद्यपि एकैव, तथापि तस्याः बहवः आकाराः सन्ति । एक आकारः प्रपञ्चस्य परमार्थसत्यत्वभ्रमहेतुः । द्वितीयश्चाकारोऽर्थक्रियासमर्थवस्तुकल्पकः । तृतीयस्तत्त्वपरोक्षप्रतिभासविषयाकारकल्पकः । तत्राद्वैततत्त्वसाक्षात्कारेण समस्तद्वैतसत्यत्वकल्पक आकाररूपः प्रथमप्रकारः निवर्त्तते । अर्थक्रियाकारिसमर्थप्रपञ्चोपादानमायाकारस्तत्त्वज्ञानेन विलीयते, अपरोक्षप्रतिभासयोग्यार्थाभासजनकस्तत्त्वाकारोऽनुवर्त्तते । स एवाविद्यालेश इत्युच्यते । अयञ्चाविद्यालेशो जीवन्मुक्तस्य न निवर्त्तते । समाध्यवस्थायां तिरोहितोऽपि अयमविद्यालेशो व्युत्थानकाले देहाभासजगदाभासहेतुतयाऽनुवर्त्तते । तेनैव च जीवन्मुक्तेरस्तित्वमभ्युपगतं भवति । तस्य च व्यवहारादिकं न स्वतः, किन्तु परदृष्ट्यैव । सकलो जानाति - न मे देहः, न मे इन्द्रियाणि, नास्ति मेऽन्यत् किञ्चित् ; नित्यशुद्धबुद्धमुक्तो ब्रह्मैवाहम् । अतएव तस्य स्वदृष्ट्या नाविद्यालेशः, न प्रारब्धकर्मादिकम् । अतएव न व्यवहारादिकञ्च । सतु सर्वदा स्वरूपस्थ एव ।

एवञ्च, प्रतिविम्वादिवादत्रये जीवनानात्वाभ्युपगमान्नेक जीववादस्वीकारः दोषः । अतः, इयं जीवन्मुक्तिर्न केवलमद्वैतिनां वेदान्तिनां परमा सम्पत्तिः, अपि तु सर्वैरेव दार्शनिकैरियमवश्यमभ्युपगन्तव्या ।

तत्र जीवन्मुक्तिस्वरूपे स्वभावे तदस्तित्वप्रमाणे तस्याः उपयोगित्वेऽपेक्षितानि प्रमाणानि युक्तिजातानि चात्र प्रवन्धे यथामति यथोपदेशं विवृतानि विचारितानि । विवेच्यविषयप्रतिष्ठायामपेक्षितं परमतनिराकरणमपि

# ADVAITAVEDANTASAMMATAM JIVANMUKTISWARUPAM

THESIS SUBMITTED FOR THE DGREE OF DOCTOR OF PHILOSOPHY(ARTS)

OF THE

UNIVERSITY OF CALCUTTA

1998

Asish Kumar Mukhopadhyay
Department of Sanskrit
University Of Calcutta
Calcutta.